CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

वाजिय-प्रोच्छ का

(८६-१० कक्षयो: कृते)

1- सह वामेन न उषो व्युच्छा दुहितर्दिव: ।
सह द्युम्नेन बृहता विभावरि राया देवि दास्वती ।। ऋ॰ 1-49

2- उवासोषा उच्छाच्च नु देवी जीरा रथानाम् ।
ये अस्या आचरणेषु दध्रिरे समुद्रे न श्रवस्यव: ।।

3- आ घा योषेव सूनर्युषा याति प्रयुंजती ।
जरयन्ती वृजनं पद्वदीयत उत्पातयति पक्षिण: ।।

4- एषायुक्त परावत: सूर्यस्योदयनादधि ।
शतं रथेभि: सुभगोषा इयं वि यात्यभि मानुषान् ।।

5- ~~यस्य×व्रत×अग्नेर्यथि×विश्व×स×××न×न××ष्ट×न×व×हि×मर्म×यत~~
यस्य व्रते पृथिवी नन्नमीति यस्य व्रते शफवज्जर्भुरीति ।।

यस्य व्रत औधधी र्विश्वरूपा: स न: पर्जन्य महि शर्म यच्छ ।। ऋ॰ 5/83

6- गिरयस्ते पर्वता हिमवन्तो रण्यं ते पृथिवि स्योनमस्तु ।
बभ्रुं कृष्णां रोहिणीं विश्वरूपां ध्रुवां भूमिं पृथिवीमिन्द्रगुप्ताम् ।। अथर्व 12/1
अजीतो हतो अक्षतो ह्यष्ठां पृथिवीमहम् ।।

7- निधिं बिभ्रती बहुधा गुहा वसु मणिं हिरण्यं पृथिवी ददातु मे ।
वसूनि नो वसुदा रासमाना देवी दधातु सुमनस्यमाना ।।

8- मद्गेहे मुसलीव मूषिकवधूर्मूषीव मार्जारिका
मार्जारीव शुनी शुनीव गृहिणी वाच्य: किमन्यो जन: ।।
किंचक्षुत्क्लमघूर्णमाननयनैरून्निद्रमुद्वीक्षितै:
कर्तुं वाञ्छयमक्षमै: स्वजननी बालै:ममालोक्यते ।। [दुर्जन:] ।।

9- सक्तून् शोचति सम्प्लुतान् प्रतिकरोत्याक्रन्दतो बालकान्
प्रत्युत्सिंचति कर्परेण सलिलं शय्यातृणं रक्षति ।
दत्वा मूर्धनि शीर्णशूर्पशकलं जर्जर्णे गृहे व्याकुला
किं तद् यन्न करोति दु:स्थगृहिणी देवे भृशं वर्षति ।। [लंगदत्त:] ।।

10- प्रायो दरिद्रशिशव: परमन्दिराणां द्वारेषु दत्तकरपल्लवलीनदेहा: ।
लज्जानिगूढवपसो बत भोक्तुकामा भोक्तारमर्धनयनेन विलोकयन्ति ।। [अज्ञात:]

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

11- पोतानेतानपि गृहवति ग्रीष्ममासावसानं
यावन्निर्वहियतु भवती येन वा केनचिद् वा ।
पश्चादम्भोधरजलपरीपातमासाद्य तुम्बी-
कूष्माण्डी च प्रभवति तदा भूभुजः के वयं के ? ॥ अज्ञातः ॥

12- देवे वर्षत्यशनपचनव्यापृता बहिर्निहेतोर्गेहाद्
गेहं फलकनिचितैस्सेतुभिः पंकभीताः ।
नीध्रान्तानविरलजलान् पाणिभिस्ताडयित्वा
शूर्पच्छत्रस्थगितशिरसो योषितस्संवरन्ति ॥ अज्ञातः ॥

13- क्षुत्क्षामाः शिशवः शवा इव, तनुर्मन्दादरो बान्धवो
लिप्ता जर्जरकर्करी जतुलवैर्नो मां तथा बाधते ।
गेहिन्या स्फुटितांशुकं घटयितुं कृत्वा सकाकुस्मितं
कुप्यन्ती प्रतिवेशिनी प्रतिदिनं सूचीं यथा याचिता ॥ अज्ञातः ॥

14- लग्नः श्रृंगयुगे गृही सतनयो वृद्धौ गुरू पार्श्वयोः
पुच्छाग्रे गृहिणी खुरेषु शिशवो लग्ना वधूः कम्बले ।
एकः शीर्ण जरद्गवो विधिवशात् सर्वस्वभूतो गृहे
सर्वैरेव कुटुम्बकेन रुदता सुप्तः समुत्थाप्यते ॥ अज्ञातः ॥

15- इदानीमर्धन्ति प्रथमकलमच्छेदमुदिता
नवीनान्धस्थालीपरिमलमुचो हालिकगृहाः ।
उदंचद्दोर्लीलारणितवलया भिर्युवतिभि-
र्गृहीतप्रोत्क्षिप्तभ्रमितमसृणोद्गीर्णमुसलाः ॥ योगेश्वरः ॥

16- गेहाजिरेषु नवशालिकणावपातगन्धानुभावसुभगेषु कृषीवलानाम् ।
आनन्दयन्ति मुसलोल्लसनावधूतपाणिस्खलद्वलयपद्धतयो वधूट्यः ॥ अज्ञातः ॥

17- एते सन्ततभूज्यमानचणकामोदप्रधाना मनः
कर्षन्त्यूषरसन्निवेशजरठच्छायाः स्थलीग्रामकाः ।
तारूण्यातिशयाग्रपामरवधूसोल्लासहस्तग्रह-
भ्राम्यत्पीवरयन्त्रकूपवनिरासद्गम्भीरगेहोदराः ॥ अज्ञातः ॥

18- हलाग्रोत्कीर्णायां परिसभुविग्रामवटका
लुठन्ति स्वच्छन्दं नखर शिखराच्छोटितमृदः ।
[illegible]
बलत्पक्षद्वन्द्वप्रभवमरुदुत्तम्भितरजः
कणाश्लेषभ्राम्यत्तमुकुलितोन्मीलितदृशः ॥ अज्ञातः ॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

19- शालिच्छेदसमृद्धहालिकगृहाः संसृष्टनीलोत्पल-
स्निग्धश्यामयवप्ररोहनिविडव्यादीर्घतीमोदराः ।
मोदन्ते परिवृत्तधेन्वनडुहश्छायाः पलाशैर्नवैः
तंतक्तध्वनिदिक्षु यन्त्रमुखरा ग्रामा गुडामोदिनः ।। अज्ञातः ।।

20- केदारे नववारिपूर्णजठरे किंचित् वचणद्दर्दुरे
शब्दूकाण्डकपिण्डपाण्डुरततप्रान्तस्थलीवीरणे ।
डिम्भा दण्डकपाणयः प्रतिदिशं पङ्कच्छटाचर्चिता-
श्चुभ्रूचुभ्रुरिति भ्रमन्ति रभसाद्बधायिमत्स्योत्सुकाः ।। अज्ञातः ।।

21- पाकक्षामतिलाः समुत्सुकयितुं शक्ताः कपोतान् भृशं
श्यामत्वं फलपीड्यमानकुसुमानापद्यते सर्षपान् ।
वार्युर्व्यस्तशगस्तुषारकणवानभ्येति कम्पप्रदः
पान्थैः शुष्कविवादबद्धकलहैः पुण्याग्निरासेव्यते ।। योगेश्वरः ।।

22- भद्रं ते सदृशं यदध्वगशतैः कीर्तिस्तवोद्गीयते
स्थाने स्थेयमनुत्तमं सुकृतिनो दानेन कर्णो जितः ।
इत्यालोच्य चिरं दृशा कृपणया दूरागतेन स्तुतः
पान्थेनैकपलालमुष्टिरूचिना गर्वायते हालिकः ।। योगेश्वरः ।।

23- संविष्टो ग्रामदेव्याः कटघटितकुटीकुड्यकोणैकदेशे
शीते संवाति वायौ हिमकणिनि नदद्दन्तपंक्तिद्वयाग्रः ।
पान्थः कन्थां निशीथे परिकुथितजरत्तन्तुसन्तानगुर्वीं
ग्रीवापादाग्रजानुग्रहणघटघटत्कर्पटं प्रावृणोति ।। अज्ञातः ।।

24- ग्रीष्मोष्मप्लोषशुष्यत्पयसि बकभयोद्भ्रान्तपाठीनभाजि
प्रायः पङ्कैकभावं गतवति सरसि स्वल्पतोये लुठित्वा ।
कृत्वा कृत्वा जलार्द्रीकृतमुपरि जरत्कर्पटाभ्रम् प्रपायां
तोयं लब्ध्वापि पान्थः पथि चलति हहा हेति कुर्वन् पिपासुः ।। अज्ञातः ।।

25- गन्तुं सत्वरमीहसे यदि गृहं व्यालोलवेणीलतां
द्रष्टुं वा स्वकुटुम्बिनीमनुदिनं कान्तां समुत्कण्ठसे ।
तत्तृष्यन्नपि मुग्धमन्थरवलन्नेत्रान्तरुद्धाध्वगा-
मेतां दूरत एव हे परिहर भ्रातः प्रपापालिकाम् ।। अज्ञातः ।।

26- अध्वश्रमाय चरणौ विरहाय दारा अभ्यर्थनाय वचनं च वपुर्जराये ।
एतानि मे विदधतस्तव सर्वदैव धातस्त्रिधा न यदि किं न परिश्रमोपि ।।
।। राजशेखरः ।।

27- क्षुत्क्षामस्तनयो वधूः परगृहप्रेष्यावसन्नः सुहृद्
दुग्धा गौरशनाभावविवशा हम्बारवोद्गारिणी ।
निष्पथ्यौ पितरावदूरमरणौ स्वामी दिशन्निर्जितो
दृष्टो येन परं न तस्य निरये प्राप्तव्यमस्त्यप्रियम् ।। कल्हण ।।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

28- वहति न पुरः कश्चित् पश्चान्न कोऽप्यनुयाति मां
न च नवपदक्षुण्णो मार्गः कथं न्वहमेककः ।
भवतु विदितं पूर्वव्यूढो धुना क्षितां गतः
स खलु बहलो वामः पन्थाः मया स्फुटमुर्जितः ।। चर्चिकीर्तेः ।।

29- रथ्याकार्पटिकैः पटच्चरशतस्यूतोरुकथाबल-
प्रत्यादिष्टहिमागमार्तिविशदप्रस्निग्धकण्ठोदरैः ।
गीयन्ते नगरेषु नागरजनप्रत्यूषनिद्रानुदो
राधा-माधवयोः परस्परहः प्रस्तावनागीतयः ।। डिम्भोकः ।।

30- ननान्दा सानन्दा हसितवदनाभूद् बहिनिका
कृतार्था च श्वश्रूः कुपितदृशि पत्यौ मयि सखि ।
स चेदुच्चैर्ब्रूते कठिनवचनैस्तर्हि सकलाः
करिष्यन्ति प्रायो वसनरहितास्ताण्डवविधिम् ।। अज्ञातः ।।

31- कन्थाखण्डमिदं प्रयच्छ यदि वा स्वाङ्गं गृहाणार्भकं
रिक्तं भूतलमत्र नाथ भवतः पृष्ठे पलालोच्चयः ।
दम्पत्योर्निशि जल्पतोरिति वचः श्रुत्वैव चौरस्तदा
लब्धं कर्पटमन्यतस्तदुपरि क्षिप्त्वा रुदन्निर्गतः ।। अज्ञातः ।।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

कुमारसम्भवात्

हिमालयः

अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः ।
पूर्वापरौ तोयनिधी वगाह्य स्थितः पृथिव्या इव मानदण्डः ।।

अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम् ।
एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः ।।

यश्चाप्सरोविभ्रममण्डनानां संपादयित्रीं शिखरैर्बिभर्ति ।
बलाहकच्छेदविभक्तरागामकालसंध्यामिव धातुमत्ताम् ।।

आमेखलं संचरतां घनानां छायामधःसानुगतां निषेव्य ।
उद्वेजिता वृष्टिभिराश्रयन्ते शृङ्गाणि यस्यातपवन्ति सिद्धाः ।।

पदं तुषारस्रुतिधौतरक्तं यस्मिन्नदृष्ट्वापि हतद्विपानाम् ।
विदन्ति मार्गं नखरन्ध्रमुक्तैर्मुक्ताफलैः केसरिणां किराताः ।।

यः पूरयन् कीचकरन्ध्रभागान् दरीमुखोत्थेन समीरणेन ।
उद्गास्यतामिच्छति किन्नराणां तानप्रदायित्वमिवोपगन्तुम् ।।

कपोलकण्डूः करिभिर्विनेतुं विघट्टितानां सरलद्रुमाणाम् ।
यत्र स्रुतक्षीरतया प्रसूतः सानूनि गन्धः सुरभीकरोति ।।

भागीरथीनिर्झरसीकराणां वोढा मुहुः कम्पितदेवदारुः ।
यद्वायुरन्विष्टमृगैः किरातैरासेव्यते भिन्नशिखण्डिबर्हैः ।।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

मधुपानम्

धृतसन्धिरतो विचित्रवृत्तिर्विदधानः स्फुटशुद्धपात्रयोगम् ।
मधुवारविधिः सनायकाङ्को ववृधे नाटकवन्नितम्बिनीनाम् ।।

सपरिच्छदवीक्षणैः सकम्पं चषके चन्द्रमसं निरीक्ष्य दध्रुः ।
मकरन्दपिशंगदीर्घिकाम्भःशफरीस्फारविवर्तनं युवानः ।।

वहतोर्मदमानयोर्विमोहं नयतोः कामपि ~~प्रक्रिया~~ विक्रियां स्वभावम् ।
प्रथमः प्रविवेश चित्तमानान्मुखरः क्वापि निरीय विद्रुतोऽभूत् ।।

हसितेव जितेव तर्जितेव क्षपितेवोन्मथितेव निर्धुतेव ।
मधुमानमदेन मानिनीनां मनसः क्वापि जगाम मानवृत्तिः ।।

मधुना शशिनः सुधेव लेभे मधुमाधुर्यमिवाटटे शशाङ्के ।
चषके प्रतिमोदयादनीचैरूभयोः स्वार्थधियेति संङ्गमो भूत् ।।

सुरभिश्रसितं सितायताक्ष्याः पतितं कोष इवादरेण गोप्तुम् ।
मदिरोत्पलमामिमील पार्या दधते के न गुणेषु पक्षपातम् ।।

स्मितपुष्पचितेषु सानुरागेष्वविपन्नस्मरवृद्धिषु प्रियाणाम् ।
तल्पैः परितृप्तता पिबद्भिर्न मुखस्वाकलिता न चासवेषु ।।

मधुपः शुशुभे निलीनमूर्तिश्चषके नीलसरोजगन्धबन्धात् ।
प्रतिमाशशिनः कलंकलेशो मधुना धौत इवोत्पलुतः क्षणेन ।।

मधुपूरपरिप्लुते दृगन्तानामतिवृद्धो व्यवतीर्यचित्तमार्गे ।
विजहार निरर्गलं प्रकोपो न च चस्खाल यदद्भुतं तदासीत् ।

अविनीतिलतावसन्तमासः सुरताशोकपुरन्ध्रिवादघातः ।
नयनोत्पलषण्डमातरिश्वा जगृहे पोषदशां मदो वधूनाम् ।।

अग्रे विकीर्णनिभृतप्रणयार्द्रवाक्यं पुष्पांजलिः सरलविभ्रमसूत्रधारः ।
प्रस्तावनां दयितसन्धिरतैः शिताथामित्थं व्यधत्त रमणीरतनाटकस्य ।।

॥श्रीकृष्णाभ्युदये महाकाव्ये॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सुन्दरी विलाप:

ततो हृते भर्तरि गौरवेण प्रीतौ हृतायामरतौ कृतायाम् ।
तत्रैव हर्म्योपरि वर्तमाना न सुन्दरी तेव तदा बभासे ।।

सा भर्तुरभ्यागमनप्रतीक्षा गवाक्षमाक्रम्य पयोधराभ्याम् ।
[illegible] ।
द्वारोन्मुखी हर्म्यतलाल्ललम्बे मुखेन तिर्यङ्नतकुण्डलेन ।।

ततश्चिरस्थानपरिश्रमेण स्थितैव पर्यंकतले पपात ।
तिर्यक्च शिशये प्रविकीर्णहारा सपादुकैकार्धविलम्बपादा।।

सा दुःखिता भर्तुरदर्शनेन कामेन कोपेन च दह्यमाना ।
कृत्वा करे वक्त्रमुपोपविष्टा चिन्तानदीं शोकजलां ततार ।।

सा स्त्रीस्वभावेन विचिन्त्य तत्तद् दृष्टानुरागे भिमुखेपि कान्त्यौ ।
धर्माश्रिते तत्त्वमविन्दमाना संकल्प्य तत्तद्विललाप तत्तद् ।।

एष्याम्यनाश्यानविशेषकायां त्वयीति कृत्वा मयि तां प्रतिज्ञाम् ।
कस्मान्नु हेतोर्दयितप्रतिज्ञः सोऽद्य प्रियो मे वितथप्रतिज्ञः ।।

नेच्छन्ति याः शोकमवाप्तुमेवं श्रद्धातुमर्हन्ति न ता नराणाम् ।
क्व चानृतिर्मयि सात्य पूर्वं त्यागः क्व चायंजनवत्क्षणेन ।।

इत्येवमादि प्रियविप्रयुक्ता प्रियेन्यदाशांश्य च सा जगाद ।
संभ्रान्तमाहूय च तद्विमानं तां स्त्री सबाष्पा गिरमित्युवाच ।।

सौन्दरनन्दस्य षष्ठसर्गतः

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

चन्द्रोदयवर्णनम्

वातरत्य विगमे समीरणे मन्दनर्तितसुगन्धिकुन्तलाम् ।
सौधपृष्ठमधितस्थुषीं वयो जानकीमिदमुवाच राघवः ।।

ध्वान्तजालमुषयाति सर्वतः सागरे निहितमण्डलं रविम् ।
वारिभिः पिहितदण्डमायतं भृंगचक्रमिव फुल्लमम्बुजम् ।।

एकचक्रमिव राजते नभः स्यन्दनस्य रविबिम्बमस्तगम् ।
उत्पतत्यविकले निशाकरे धातुपंकपरिदिग्धमण्डलम् ।।

उन्मुखा दिनकरस्य रश्मयः सागरान्तरितमण्डलश्रियः ।
भान्ति तोयमभिभूय निर्गता वाडवस्य शिखिनः शिखा इव ।।

अन्धकारनिकरेण सर्वतः कृष्णसर्पमलिनेन सर्पता ।
रूध्यमानविषयाः समन्ततःसंकुचन्ति परिखा नु दिग्भुवः ।।

मीलिता रविभयेन तारका रश्मिधामहतलोहिता इव ।
उन्मिषन्ति दिनकृत्करात्यये दिंड्मुखैकरचनाः समन्ततः ।।

अन्धकारनिकरं करैरिमं भिन्दतः शशधरस्य मण्डले ।
धूलिपुंज इव भाति तामसः क्षोभवेगपतितः शशाकृतिः ।।

भाति विभ्रदसितोत्पलप्रभं लक्ष्म मृगमयं हिमद्युतिः ।
श्यामलावदनबिम्बकान्तिभिर्बद्धमध्य इव रूप्यदर्पणः ।।

जानकीहरणस्य अष्टमसर्गतः

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

राजधानी उज्जयिनी

अस्ति क्षितावुज्जयिनीति नाम्ना पुरी विहायत्यमरावतीव ।
बबन्ध यस्यां पदमिन्द्रकल्पः श्रीविक्रमादित्य इति क्षितीशः ।।

आमंजु गुंजत्कलहंसपंक्ति - र्विकस्वराम्भोजरजः पिशंगा ।
आभाति यस्याः परिखा नितम्बे सशब्दजाम्बूनदमेखलेव ।।

वृन्ताद्यपास्तैर्मरुता विकर्णैः सुगन्धिभिस्तीरतरुप्रसूनैः ।
शिप्रासरित् कूलतमालनीला विभाति यस्याः कबरीलतेव ।।

बिलंघयन्ति क्षितिवर्त्म यस्यां लीलावतीनां नयनोत्पलानि ।
विभर्ति यस्यामपि वक्रिमाणम् एको महाकालजटार्धचन्द्रः ।।

गतासु तीरं तिमिघट्टनेन सभ्रमं पौरविलासिनीषु ।
यत्रोल्लसत्फेनततिच्छलेन मुक्ताट्टहासेव विभाति शिप्रा ।।

संसर्गमासाद्य विलासिनीनां विलासवेश्मागरुधूपधूमैः ।
बद्धास्पदाः सौधशिखासु यस्यां सुगन्धि तोयं जलदा वमन्ति।।

नवाम्बुवाहप्रतिबिम्बवत्यां यत्रोच्चहर्म्याङ्गणरत्नभूमौ ।
व्यक्तिं लभन्ते सुरसुन्दरीणां सालक्तकाः प्रावृषि पादमुद्राः ।।

कृतावधानातिशयेन मन्ये या वेधसा मध्यमलोकरत्नम् ।
स्वशिल्पविज्ञानपरप्रकर्ष प्रकाशनाया त्र विनिर्मितेव ।।

।नवसाहसांकचरितस्य प्रथमसर्गतः।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

शरद्

वनस्पतीनां सरितां नदीनां तेजस्विनां कान्तिभृतां दिशांच ।।
निर्याय तस्याः स पुरः समन्ताच्छियं दधानां शरदं ददर्श ।।

बिम्बा गतैस्तु तीर -बनैः समृद्धिं निजां विलोक्या पहृतां पयोभिः ।।
कूलानि सा मर्षतयेव तेनुः सरोजलक्ष्मीं तथल -पद्म - हासैः ।।

तिग्मांशु - रश्मिव्र - छुरितान्य -दूराद् प्रांचि प्रभाते सलिलान्यपश्यत् स।
गभस्ति -धाराभिरिव द्रुतानि तेजांसि भानोर्भुवि संभृतानि ।।

स्त्री - भूषणं चेष्टितमप्रगल्भं चारूण्यवक्राण्यपि वीक्षितानि ।।
ऋजूंश्च विश्वास-कृतः स्वभावान् गोपांगनानां मुमुदे विलोक्य ।।

विद्युत्-पार्श्वं रूचिरांगहारं समुद्वहद्-चारू-नितम्ब-रम्यम् ।।
आमन्द्र-मन्थ-ध्वनि-दत्त तालं गोपांगना-नृत्यमनन्दयद् तम् ।।

विचित्रमुच्चैः प्लवमानमाराद् कुतूहलंत्रस्तु ततान् तस्य।।
मेघात्ययोपात्त - बनोपशोभं कदम्बकं वातमजं मृगाणाम् ।।

सिता रविन्द -प्रचयेषु लीनाः संसक्त -पर्णेषु च सैकतेषु ।।
कुन्दावदाताः कलहंस -मालाः प्रतीयिरे श्रोत्र -सुखैर् निनादैः ।।

न तज् जलं, यन् न सु-चारू-पंकजं, न पंकजं तद्, यद्-लीन-षट्-पदम् ।।
न षट्-पदोऽसौ, नजुगुंज यः कलं, न गुंजितं तन्, न जहार यन् मनः ।।

"भट्टिकाव्यस्य द्वितीय सर्गतः।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अनुत्तरदायितां मा गम: सुकवे !

महराजदीन पाण्डेय:

अनुत्तरदायितां मा गम: सुकवे मा गमस्त्वम् ।
भुवि विचर जीवितेषु पलायय शून्ये मा भ्रमस्त्वम् ।

न नासामक्षिकाया: काचिदत्र सारे रूचिस्ते,
श्रुतमिदानीं स्वप्नालोकने सततं मतिस्ते,
अथैवं कालजयि रचने दृढं सोपक्रमस्त्वम्
अनुत्तरदायितां मागम: सुकवे मामकस्त्वम्

अथ श्रृणु योन जीवति स्वकीये समये न जीवति
न कवते स्यूतम सौ दृणाति दीर्घं पून: सीवति
समे लिम्पन्तु वन्धो मालिप: सत्ये तमस्त्वम्
अनुत्तरदायितां मा गम: सुकवे मागमस्त्वम् ।

रणशिरसि यत्र कविता तत्र सेवां किं करिष्यसि,
इति न बुद्ध्वा कियत्कालंच कलंम ब्रूहि नर्तयिष्यसि,
कियत्कालं शयानो द्रक्ष्यसे पथि साचमस्त्वम्
अनुत्तर दायितां मा गम: सुकवे मा गमस्त्वम् ।।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

प्रकृतेरुत्सङ्गे

भास्कराचार्य त्रिपाठी

अधकामये मुक्तविचरण प्रकृतेरुत्सङ्गे
मुषितं सखे मनः सर्वस्वं कोलाहल सङ्गे
सुरभिमेदुरं परिजिघ्रेयं नवलं केदारम्
आम्रकूट शिखरं पश्येयं धूतरसालभारम्
पेन्न कोमलः कपिल निर्झरो निपततु सर्वाङ्गे

अद्य कामये .....

खर्जूरेश्वरमालोकयितं बलवदातुरोऽहम्
ललितमन्दिरेष्वलिवद भ्रमितुं कदापारयेयम्
अहो समर्था शालभञ्जिका कथं मान भङ्गे

अद्य कामये .....

अवगाहिष्ये रेवानीरं धवलतटौ पश्यन्
गमिष्यामि निकषा दशार्णकं दीर्घायुर्विन्दन्
संजीवनी सदा विच्छुरिता नवपलाशरङ्गे

अद्य कामये .....

पवन माधुरी त्रेधा विहरति पंचमठक्षेत्रे
मदयति कमनीया कुंजाली कस्य नवा नेत्रे
सततं रागसारणी प्रवहति सघने विन्ध्य भृङ्गे ।

अद्य कामये .....

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

कथय, कथय रे भिल्ल !

राम किशोर मिश्र:

कथय कथय रे भिल्ल ! किं वा न शृणोषि
विश्रब्धं व्याहराभि किंचिद् वद भ्रात:
किं ब्रवीषि, नित्यमेव काष्ठान्याहरसि बनात्
आपि नग्न: स्वच्छन्दं मधु पिबसि मुदा ?
न त्वमेव दिगम्बर: स शिवो वृषभवाहनोऽपि
त्वमिह समाधिरतो डमरुवादको सि ।
त्रिशूलधारी वल्कली च किं न मृग चर्मावृतोऽसि ?
कथय कथय रे ~~भिल्ल~~ भिल्ल !
किं शबर: किरातोऽसि पुलिन्दोऽपि किम्
कथय पर्वत पुत्र ! क्व ते पर्वत पुत्री पार्वती ?
त्वमादिवासी भारत भूमे: संस्कृति रक्षकोऽसि
अतस्व तव बाला: आङ्ग्ल शालासु न पठन्ति?
तांस्तत्र संस्कृति रक्षणाय न त्वं पाठयसि ?
कथय कथय रे भिल्ल !
त्व मद्यापि धनुश्चालयासि यस्त्वां शिक्षयति सतवगुरू:
तव पूर्व जो हिरण्य धनुरासीद यस्यात्मज: स एकलव्य:
तेन गुरुदक्षिणायां कृत मङ्गुष्ठदानम्
त्वं सम्प्रति निज गुरवे किं ददासि ?
कथय कथय रे भिल्ल !

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

चिरेप्सिता विहीयतां सखे !

"डा० पुष्पा त्रिवेदी"

अयि ! मिलिन्द ! सहि मधुरसो निपीयतां
चिरेप्सिता विहीयतां सखे !

त्वद्वियोगतापितं
क्षीणतामवापितं
पद्मिनीकुलं निवृत्य जातु दृश्यताम् ।
न किंचिदप्युपेक्ष्यतां सखे !

दर्दुरैः समाकुले
पंकिले च भूतले
शब्दमात्रमपि पिंकीकुलेन नोच्यताम् ।।
कुदैवमेव शोच्यतां सखे !

आम्रमंजरीयुते
नवमधौ समागते
परंभृताकुलेन नो कथं प्रहृष्यताम् ।
कुहूरुतंच गीयतां सखे !

मेघमालिकारतो
व्याकुलश्च चातको
धूमराशिना न सो पि संप्रवंच्यताम् ।
तृषाकुलो विशीर्यतां सखे !

वारिणोपसंभृते
संगते पयोधरे
ऊर्ध्वमस्तकेन किं जलं न पीयताम् ।
तृषा च संविलीयतां सखे !

यामिनी समुत्थिता -
यज्ञवाकयोषिता
अयि ! कथं वियोगसिन्धुतो विमुच्यताम् ।
दिवाकरोऽवलंब्यतां सखे ! चिरेप्सिता विहीयतां सखे !

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

लावण्यम्

"डा० इन्द्रमोहन सिंह"

लावण्येन यौवनं यौवनं भवति ।
माधुर्येण गायनं गायनं भवति ।।

चलति बाला युवमनोमाला,
पेया नयनविधिनैव हाला,
सौन्दर्येण दर्शनं दर्शनं भवति ।
लावण्येन यौवनं.....।

मधुहृदययोर्मिलनमतिमधुरम्,
नयो रागरतिगीतमतिसुकरम्,
लालित्येन मधुवनं मधुवनं भवति ।
लावण्येन यौवनं.....।

जगत: सर्वपीडादु:खानि,
प्रियास्नेहसंस्पर्शविहतानि,
शैतल्येन चन्दनं चन्दनं भवति ।
लावण्येन यौवनं.....।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

गीतम्

।जानकी बल्लभ शास्त्रिण:।

अधुना नयनयोर्नहि वारि ।

गीतमथ न निर्गमिष्यति भुवनमोहनकारि ।
अधुना नयनयोर्नहि वारि ।

दीपितैका दीपिका पितु कलुषिते सदने न
दर्शयेत् कथमपि पतंग: प्रेम कियद्विकारि ।
अधुना नयनयोर्नहि वारि ।

लुब्धकेन न जालमास्तीर्णं विटपिशिखरेषु
किन्तु कलयेद् विहगवृन्दं सघनगगनविहारि ।
अधुना नयनयोर्नहि वारि ।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

हे चाटुकार !

ओम् प्रकाश ठाकुर:

हे चाटुकार ! तव चाटुकला
जगदखिल कलानां कमनीया ।
अगुणे गुणगणदर्शन दक्षा
भुविकस्य नरस्य न रसनीया ।
तव सुधाम धुरवचनं श्रुत्वा
दृष्ट्वा हृदयं रसभरभरितम् ।
परूषोऽपि सदा कोमलकान्त:
धन्यस्त्वं धन्यं ते चरितम् ।
व्यापकतामयं रसनिर्भरताम्
अस्या न कुत्र संपश्याम: ।
पशुपक्षिगणान् मनुजान् दनूजान्
एतद्वशंगतितान् पश्याम: ।
श्रुत्वा भर्तु: प्रिय चाटुवच:
तुरगोगत्यां बेगं धत्ते ।
उन्मदहस्ती मधुरालापै:
स्वामिन आदेशं पालयते ।
जानीते नृणां सद्वेषु
कश्चित् प्रयोग कौशला शिल्पम् ।
सर्वानवधूय स यात्यग्रे
विभवं सौख्यं लभते नल्पम् ।
निष्ठावन्तो सत्नैरूर्ज्यं
विन्दन्ति न तादृश महिमानम् ।
उप द्वारैस्त्वं स्तुति वचनानां
लभसेद्रनाणां गरिमाणम् ।
षष्ट्या धिककलासु कलामेतां
कथमिव विज्ञा विस्मृतवन्त: ।
कार्यारम्भे मंगलमिषत:
अथवैनां धुरिकीर्तितवन्त: ।
तवसरसकलेयं चाटुकार !
कामं प्राक्तन पुण्यै: प्राप्या ।
पुनरपि विशिष्ट यत्नैरस्या
अधिगन्तव्या काचिन्मात्रा ।
गेहे समाजमध्ये देशे
सकलोद्योगानां समवाये
प्रचरेन्मधुमती कलाचाशु
विधा गुह्येव यथाऽऽम्नाये ।।

:-:-:-:-:-:-:

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अहं स्वतन्त्रः

रेवा प्रसादः सनातनः

अहं स्वतन्त्रः
परं निन्दितुं
यदि वात्मानं स्तोतुम्
तर्पयितुं मम मानसगृध्रं
पोषयितुं मम कायम्
धातु-मात्र संकायम्
अहं स्वतन्त्रः
परस्यकण्ठे करपत्रं चालयितुम्
अर्थैः सिद्धयतु न वा मदीयः
परस्य मार्गं रोद्धुम्
जननेतृत्वं बोद्धुम्
बहुमतलब्धये यथाकथंचित्
कूटगवीमपि दोग्धुम् ।
अहं स्वतंत्रः
पटु प्रवक्तुं यमनियमानामर्थान्
लब्धुं ततो दक्षिणाद्रव्यं
निर्मक्षिकमिदमत्तुम्
बलीबर्दइव किंच गेहिनीं
सभां-समीनां कर्तुम्
गोत्रं स्वं वर्धयितुम् ।
अहं स्वतन्त्रः
स्वकां मातरं कारायां पातयितुम्
कर्कटशाव इवोदरमस्या
भित्त्वा त्मानं लब्धुम्
अस्या भूषणरत्नराशिमपि
निजां सुन्दरीं
देशान्तरगतवत्वरघुनीं विधातुम् ।
अहं स्वतन्त्रः
स्वर्णस्थाल्यां कोद्रवकं रन्धयितुं
मुखे वृषाणामामिष खण्डं हहहा प्रसभं धातुम्
माहिष्मतीं पाटली पुत्र क्षेत्रं ध्वंसं संसाधयितुम्
काकशरीरं मुक्ताकल्पैर्हंसमिव श्वेतायितुं
नग्न नृत्तं कर्तुम्

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सुतनुका

डा० कमलेश दत्त त्रिपाठी

आर्ये सुतनुके
कलातत्त्वे भवति ऐन्द्रवि
सुतनुके
अपि शृणोषि
परिचिनोषि समागतं तं
यं कमपि वाराणसेयं परावृत्तम् ?
भेदिता अब्दा: शिलीभूता:
अर्णव-प्रतर: परस्तात् समय-जन्मा
अग्रतत्त्वम् ।

स्वरहिमानी पर:शतं वर्षाणियावज्जडीभूता
स्पन्दते
श्रूयते
त्वन्नूपुराणां मन्द-मन्दो रव: शनकै:-
आहतो मुरजो
घनोऽयुं ताल-धारी,
झङ्कृता तन्त्री
पूरयन्नालापचारम्
वंश कोऽपि,
तरति वायौ स्वरस्ते परिदेवनार्द्र:

एष वर्ते
रिक्त-रिक्त:
एषु दिवसेष्वहं वर्ते
द्विधाभिन्न:
एकतो मे
खण्डित: स्वात्मा स्रष्टरि निबद्धो
नाति विशद:
पातितं भूमौ शरीरम्
विवार्पितं मम मनोज्योति:
कोऽपि जाने
सन्ततं मे
घर्षयन् व्यभिचरति सत्ताम्

अपरत: प्रखरप्रकाशो
महासत्त्वोदीर्ण तेजा:
प्रतिजवं जागर्ति
चिनुते नैव दैन्यं

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

नापि भीतिम्
जायते
जाजायते प्रतियोद्धुकामः प्रति विचारम् !
त्पर्धते
पस्पर्धते
संस्थातुकामः प्रत्यहंच ।
स एवाहम्
स्पदशः
परावृत्तस्त्वां विचिन्वन्
शिलावेश्मनि
कला वेश्मनि
शाश्वतेऽस्मिन्
ममास्ति त्वं शिलीळूतम्
तक्षितं परिणामितम्
ननु देवशिल्पादाहलम्
अनुकारितम्
अनुकीर्तितम्
संस्कारितम्
संशसितम्
शिल्पेनतीने ।
आर्य सुतनुके
सौरवृत्तो पि
त्वया संजीवितोऽहम्
गताजडताम्
पुनरहा
संचेतितोऽहम्
एष वर्ते,
अर्प श्रृणोषि
परिचिनोषि
आर्य सुतनुके !

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अस्तितानुभूतिः

देवदत्त भट्टिः

सूर्येऽस्तमिते
अस्माकमपि विवेको स्तं याति ।
विवेको हिमाच्छादितो भवति,
कस्मिन्नपि तापमाने तन्न द्रवति ।
लोको विलासिता नग्न नृत्यमारभते ।
तत्र न कश्चिदन्तरायः पदं दधाति ।
श्रमे एव कस्यचिदुपधानं भवामः ।
कस्यचिदपि विष्टरे सहभोगिनो भवामः ।
कस्यचिदपि पुर आस्तरणमिवाचरामः ।
वेश्या वीथयस्तैरपि सृज्यन्ते
ये सदैव क्रेतुं विक्रेतुमुत्का भवन्ति ।
ऋतुश्चेयान् धृष्टः,
यत्प्रतिसायं मस्तिष्कमाक्रामति ।
यत्किमपि आवृतं भवति
तत्तदनावृतं भवितुमारभते ।
वैवश्यवीथिषु युवता तमसि मज्जति ।
अविवाहितात्मजाया उदरमुन्नतं वीक्ष्य प्रश्न उदेति-
तपति मरूस्थले कैक्टसा कथमुद्भवन्ति ?
गल्पगृहेषु केवलम्
कोलाहल एवोद्भवति ।
अत्र प्रत्येकभाषा
शब्दानामाश्रयदण्डेन दीर्घं कूर्दते ।
सकलश्च समुदायः
सवेपथुप्रततिं ।
कदावधि चलिष्यति प्रथेयम् !
यदा मानवः स्वास्तिता मनुभविष्यति,
तदैतद् विषं न पास्यति ।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

बसन्तः

---- द्वारका प्रसादः शास्त्री ।

१- स्थले सर्षपाः पीतवर्णानवद्या
जले पद्मपङ्क्तिः प्रिया भाति नव्या ।
वने किंशुकाभारूणा चातिदिव्या,
छटैषा सुधीभिः सदा बन्दनीया ।।
बसन्तस्य शोभा सखे दर्शनीया ।।

क्वचिन्मल्लिकामालती-मंजुहासः,
क्वचित्केतकी-कुन्द-पुष्पप्रकाशः ।
क्वचिच्चम्पकाशोकराजैर्विकासः,
प्रसूनावली राजते नन्दनीया ।
बसन्तस्य शोभा सखे दर्शनीया।।

क्वचित्कोकिला-काकली-गीति-तन्त्री
क्वचिद्भृंगसंगीतिका तापहंत्री ।
क्वचिद् गन्धवातः मनोजस्य मन्त्री,
बसन्तच्छविः सर्वतः श्लाघनीया ।
बसन्तस्य शोभा सखे दर्शनीया ।।

स्फुरन्मंजरीणां किरीटं दधानः,
प्रफुल्लोल्लसत्पुष्पवासो बसानः ।
वराभो बसन्तो विभाति प्रधानः,
धरेयं बधूटी समभ्यर्चनीया ।
बसन्तस्य शोभा सखे दर्शनीया ।।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

प्रत्यूषगरलम्

डा० केशव चन्द्रदाश:

समरोऽवगाहते
तारकाया: प्रत्यूषगरले
कलिकाया अलसविक्षेपे
काकलिस्तु कोलाहल:
कुसुम चरिते भीति: पीतायते ।
काकदम्पती साध्यस्नेह इव
नवस्तवे शान्ति: शब्दायते
प्राची कुटीरे तु
अनिर्वचनीय: श्वस्तनस्य मोह:
ज्वालायते समयस्य जरा: ।
न वा वर्षति पर्जन्य:
न यज्ञाद्वा अन्नं सम्भवति
सत्यं रूधिरायते
प्रस्थान चत्वरे
अरण्य विलोपागह्वरायते
अस्तशिखरे .....
धरा दूरायते धूसरदूर्वाति:
मार्गाणां जनपदे
अहं निम्नगामी
अवरोहे वेगगुरू:
स्खलन भूमिकायाम्
विश्लथ पथिक: ।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

विधानं विना

डा० राजेन्द्र मिश्र:

जीवनं रोचते नो विधानं विना ।
मोदते नैव हंसो निधानं विना ।।
मल्लिका मंजरीणां विकासाशया
भ्रं चंचरीको मृतो हन्त पानं विना ।।
आगतेयं कुतो मेनका दृक्पथे
खंडित: कौशिको यं प्रमाणं विना ।।
कीदृशीयं शिखाग्ने: हृदि प्रोत्थिता
स्वप्न हर्म्यं हुतं तैल दानं विना ।।
शास्त्र चर्चां विधत्ते सुरामन्दिरे
मासि बन्धो ! पशुत्वं विषाणं विना ।।
पश्य दुश्चेष्टितं मृत्तिकामानव:
क्लिश्यते व्योम रोद्धुं विमानं विना ।।
चंचलैस्ते कटाक्षै: विचित्रं कृतम्
रोग उन्मूलितो मे निदानं विना ।।
रूप भूमौ प्रविष्टो मृगो दिग्भ्रमै:
प्राहरद्भिल्लजा: कापि बाणं विना ।।
नैव नृत्यं न वाद्यं न वर चर्चरी
उत्सव: कीदृशो यं वितानं विना ।।
वायसानां कुले पालितेयं पिको
ज्ञायते तत्क्शं कण्ठगानं विना ।
धर्षिता हिं अजीवै: समाजाटवी
शक्यते नैव गन्तुं कृपाणं विना ।।
पूर्वजन्मार्जितप्रीतिं पूतान्तरम्
कोऽभिराजं निबध्नाति दानं विना ।।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

कीदृशी धवलता

"कृष्णलाल:"

ते कथयन्ति रजतजयन्ती
स्वतन्त्रताया अद्य आगता,
अद्य च सर्वं रजतमयं
धवलं संजातं
सकलास्वपि देशस्य दिशासु ।
अहं च तावदहर्निशं भीं:
विस्फारितनयनो बहिरन्त:
अन्विष्यामि धावल्यं रजतस्य,
रूप्यकाद् रजतमेव निष्क्रान्तम्,
का कथा धवलत्वस्य धनस्य ।
महदिदमपरं दौर्भाग्यम्
यच्चन्द्रो श्रूयता पूर्वं
रजतमयो धवल: शुभ्रो वा
सो पीदानीं धूलिमय:
पाषाणमय: कथ्यते बुधै: ।
महानगर्या: पार्श्वे मध्ये
पूयस्राविणो नेके स्फोटका:
कुटीरवसतय:
यासां मालिन्यं दुर्गन्ध:
संक्रामति सर्वत्र अबाधम् ।
किन्तु धवलत्वं मतपत्रेषु तेषु दृश्यते ।
धवलोन्नतसौधसाधिता:
शाला दृश्यन्ते सुमहत्य:
शासनविहिता वा निजहस्तगता वा
तासु च दीव्यति दिनसमयेऽपि
विद्युद्धृतिच्छाया सर्वत्र ।
अहो वैभवम् !
रजतं खलु तत्रैव वर्षति
तदभावे दुर्दिनं जनस्य ।
~~दित्तंव्यवसनरतपुलीन:~~

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

वित्तं यस्य स नरः कुलीनः
बुद्धिवैभवं वित्तादाने
निर्बुद्धेस्तु कुतो बलम्?
ते कथयन्ति कथं न दृश्यते
राजतवर्णो राष्ट्रध्वजपट्टे युष्माभिः ?
दृश्यते दृश्यते साधु दृश्यते ।
परन्तु धर्मचक्रं तत्
शासनचक्रबद्धं, न चलति ।
धर्मविहीने शासनतन्त्रे
किं वा तत् चक्रं कुर्यात् ?
ते कथयन्ति "धवलोज्ज्वलपरिधानवृतम्
रजतमयं रूपम् अस्माकम् ।
नृत्यामश्च जलपानगृहेषु
रात्रिमिलनस्थलेष्वपि वा
गौराङ्गनाभिः समं परन्तु
धवलिमा नेत्रयोर्लुप्यते
रागेण कादम्बर्या अनवरतम् ।
किं कुर्याम ?
प्रक्षालयामो वयं मनः
उज्ज्वलभारतशिर्नूनम्,
परन्तु धूमो वर्तिकाया
अधरप्रियायाः
यावदन्तः प्रविशति तावत्
सर्वं तेन क्रियते मलिनम् ।
तां च वदन्तु भवन्त एव
कस्त्यजेदधरागताम् ?
गौराङ्गाणां भाषया वयं
मन्यामहे श्वेतानात्मनः
भाषापि तेषां श्वेतवर्णा किम् ?
दूरमास्तां मातृभाषा राष्ट्रभाषा ।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

नवं न तत्त्वं विज्ञानं भोः ।
संकुचितवृत्तयो जना वदन्ति तां भाषाम् ।
वयं तावदुदारहृदया
वसुधा हि कुटुम्बमस्माकम् ।
ब्रुवन्तु भवन्तः तस्मिन् कुटुम्बे
कथमांग्ल्या विना जीव्यते ।
भवतु नाम विनाशः कालस्य
वृथा श्रमो वा बुद्धेस्तत्र
अस्माकं सर्वे जना अनिवार्यं त्यक्त्वा स्वकीयभाषामिह रे ,
आंग्लीमध्येष्यन्त्यनिच्छयापि,
अन्ताराष्ट्रियभावस्तेषाम्
अनेन जागरिष्यति नूनम् ।
राष्ट्रियत्वं संकीर्णभावना ।
आंग्ल्यामेव धवलिमा,
उच्चैस्तया हि पदमधिगम्यते ।
अस्मिन् राष्ट्रे रजतजयन्त्यां
कृष्णजनानां कृष्णभाषया
किं प्रयोजनम्?
अपेत अपेत रे, रजतजयन्त्यां कृष्णजनानां राष्ट्रभाषया
नैव ब्रूत रे ।
न चौज्ज्वल्यं मलिनीकृत,
न वयमिच्छामो दूषयितुं
स्वातन्त्र्यम्
आमोदप्रदं
राजतं,
येन राजते नेतृणामस्माकं विभवः ।
बन्धो, एतादृशी धवलता
रजतजयन्त्यां स्वतन्त्रतायाः
दृष्टा मया, महताधासेन ।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

गीतम् / राधावल्लभः त्रिपाठी

भ्रान्त्वा क्लान्तः खिन्नमनाः सम्प्राप्तः
सायं पुनरिह स्वं निकेतनम्
दृष्ट्वा त्वया सखेदं दयिते
दीयते खेदस्य वेतनम्।

इयमन्यतमा विलासलुलिता दृष्टिः
मुहुरुज्जीवयतेतराम्
कार्यालय-हर- कोपानल-भस्मसात् कृतम्
अङ्गेष्वनङ्गमहो मकरकेतनम्।

अनुदिनमनुक्षणमनुसंसारम्
मुहुरिह सरणं मुहुरिह मरणम्,
आसङ्गते राविप्रयोगतायास्ते
मुहुरुच्छ्वसितं मुहुरयि जीवितम्।

क्रान्त्वा द्वारं पुनरपि मृत्यो-
रायातः स्वकुलायवेश्मकम्।
जीवनरसमयि, यत्रासीना
कुरुषे स्नेहनिवेशनम्॥

भ्रान्त्वा क्लान्तः खिन्नमनाः सम्प्राप्तः
सायं पुनरिह स्वं निकेतनम्।
दृष्ट्वा त्वया सखेदं दयिते
दीयते खेदस्य वेतनम्॥

—o—

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

विश्वशान्तिनिरस्त्रीकरणगीतम्

इयं नाभिकीयास्त्रसमृद्धिः विश्वस्यास्य विनाशकरी ॥
नैव स्पृहया मानवतायाः नैव विश्वकल्याणकरी ॥

नैव कामये प्रक्षेपास्त्रं नैवं वा रासायनिकम् ।
अन्तरिक्षयुद्धं नोऽस्माकं लक्ष्यं विश्वातङ्कभृतम् ॥
आवसुन्धरा पारे नभसः शान्ते सकलसन्त्रासम्
संहर ~~संसं~~ संहर मा कलङ्कितं कुरु मानवताकुलजातम् ॥
शस्यश्यामला सुजला सुफला धरा सुरक्ष्या पुष्टिकरी
इयं नाभिकीयास्त्र - - - - - - - - - ॥ १ ॥

अयि ! मृत्योर्व्यापारे निरता, यौद्धारो श्रोतव्यमियम्
परवृत्तिमेष्यतिप्रयासं स्वोत्पत्तौ पूर्णत्वभृतम् ॥
ततो विपर्यासो न विधेयः प्रकृतौ दानवताकृत्यैः ।
संरक्ष्या मानवता नैतिकमूल्यविवर्धितसौहित्यैः ॥
सृष्टिरियं सुखबीजसमृद्धिं कांक्षति सर्वाह्लादकरीं ॥
इयं नाभिकीयास्त्र - - - - - - - - - ॥ २ ॥

सौमनस्य सौहृदिपूरितं सतताभोदप्रमोदकरम्
विश्वविदं कल्याणवर्षणं भूयात् शान्त्यापूरस्तृतम्
मानसशक्तिविकासकेन्द्रकं वैचारिकसंस्कारकरम्
संवर्धति जीवनसमृद्धिं सच्चारित्र्यविकासपरम् ॥
रत रत चुम्बत हृदि शान्तिं या संकल्पशिवकरी
इयं नाभिकीयास्त्रसमृद्धिः विश्वस्यास्य विनाशकरी
नैव स्पृहया मानवतायाः नैव विश्वकल्याणकरी ॥
॥ ३ ॥

नलिनीशुक्ला

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

प्रयाण-गीतम्

— हरिद्वत्तरणी।

चलन्तु वीरसैनिकाः, प्रयान्तु वीरसैनिकाः।
सगौरवं सडिण्डिमं व्रजन्तु वीरसैनिकाः॥
त्रिवर्णभारतध्वजं नमन्तु वीरसैनिकाः।
धरातले स्ववीरतां प्रसारयन्तु सैनिकाः॥

स्वलक्ष्यमस्तु केवलं विपक्षपक्षखण्डनम्।
स्वशत्रुरक्तशोणितैः स्वभूमिभालमण्डनम्॥
विमोहभीतिकम्पनं त्यजन्तु वीरसैनिकाः।
चलन्तु वीरसैनिकाः, प्रयान्तु वीरसैनिकाः॥

करे सुशस्त्रमण्डनं, स्वरे च सिंहगर्जनम्।
जने जने व्रतं दृढं स्वमातृभूमिरक्षणम्॥
स्वदेशपुण्यगौरवं स्मरन्तु वीरसैनिकाः।
सदैव कर्मवीरतां भजन्तु वीरसैनिकाः॥

नभोविशालमण्डले जयध्वजप्रसारिणी।
प्रयातु वीरवाहिनी कृपाणबाणधारिणी॥
सुदुर्गमे जले स्थले, अटन्तु वीरसैनिकाः।
चलन्तु वीरसैनिकाः, प्रयान्तु वीरसैनिकाः॥

समुद्रदुर्गपर्वताः सहस्रमार्गबाधकाः।
पदं न जातु कम्पतां, भवन्त्वसङ्ख्यकण्टकाः॥
पदं सदैव वर्धताम्, मनोबलं प्रवर्धताम्।
न कर्मधर्ममूमितः स्खलन्तु वीरसैनिकाः॥

प्रचण्डभास्करातपोऽथवा हिमप्रवर्षणम्।
पदं तु नावरोधयेत् कठोरवज्रवर्षणम्॥
अखण्डपौरुषैर्धरां जयन्तु वीरसैनिकाः।
चलन्तु वीरसैनिकाः, प्रयान्तु वीरसैनिकाः॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

विज्ञाननौका

श्रीनिवासरथः

विज्ञाननौका समानीयते
ज्ञानगङ्गा विलुप्तेति नालोक्यते ।
संस्कृतोद्यानदूर्वा दरिद्रीकृता
निष्कुटेषु स्वयं कण्टकिन्याहिता ।
पुष्पितानां लतानां न रक्षा कृता
विस्तृता वाटिका-योजना निर्मिता ।
के कथं कुत्र वा क्रन्दनं कुर्वते
राजनीतिश्मशानेषु न ज्ञायते ।
विज्ञाननौका·····

वर्तमानस्थितिर्मानवानां कृते
प्रत्यहं दुर्निमित्तैव संलक्ष्यते ।
यत्र कुत्रापि शान्तिः समुद्घोष्यते
तत्र विध्वंसबीजं समायोज्यते ।
सर्वनाशार्थविद्यैव विद्योतते
स्वार्थरक्षावलम्बोऽपि नो चिन्त्यते ।
विज्ञाननौका ·····

दक्षिणेनाफ्रिकादेशमुद्दीपिता
गौरवर्णाधमानां विवेकान्धता ।
दूयते मेदिनी तत्र रक्तावृता
भूरि सन्तप्यते मानवी सभ्यता ।
लोकतन्त्रानुरोधः परेषां कृते
स्वे नियोगे तु दासप्रथा ऽऽश्रीयते ।
विज्ञाननौका·····

तारकायुद्धसम्भावनाऽधीयते
गोपनीयायुधानां कथा श्रूयते ।
विश्वशान्तिप्रयत्नेषु सन्दृश्यते
विश्वसंहारनीतिर्यथोपास्यते ।
भूतले जीवरक्षा परिक्षीयते
जीवनाशाऽन्तरिक्षेऽनुसन्धीयते ।
विज्ञाननौका·····

विश्वबन्धुत्वदीक्षागुरूणां व्रतं
धर्मसंस्कारतत्त्वं बतास्तङ्गतम् ।
लोककल्याणशिक्षासमाराधनं
हन्त ! विक्रीयते काव्य-सङ्कीर्तनम् ।
यन्त्रमुग्धान्धताऽहर्निशं सेव्यते
संस्कृतिज्ञानरक्षा न सञ्चिन्त्यते ।
विज्ञाननौका समानीयते
ज्ञानगङ्गा विलुप्तेति नालोक्यते ।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

जागरणीयमासीत्

यदा मया जागरणीयमासीत्
तदैव निद्रां सहसा गताऽहम्,
तदीयसंस्पर्शवशान्न जाने
कथं कुतो वाऽवशतां गताऽस्मि.

निमीलिते हाऽलसपक्ष्मणीमे
निद्राऽप्यहार्षीदखिलं मदीयम्,
हा स्वर्णवेला खलु सा मदीया
पुनर्न चाग्रे प्रसृता कथञ्चित्.

श्रीधरभास्करो वर्णेकरः

कथं पुनः स्यात् स समागमो यो
विच्छेदरूपेण विनिर्जगाम,
स्वायत्तमुद्वास्य सुखं समक्षं
स्वप्नेऽवमग्नाऽभवमप्रगल्भा.

गृहं यथापूर्वमदो जडं यत्
स्थितं गतिस्तस्य च सम्यगस्ति,
अकालवर्षेण तु हन्त धौतं
पङ्कं विनाऽङ्कादि समस्तमेव.

हा हन्त हे प्राण रसे रसे ते
प्रवञ्चना सा विषमावपद् वै,
मां प्रत्यसौ दुर्नियतिर्नु किंस्वित्
समाहसद् वाऽथ समारुदद् वा.

Kashi Maharani Collection, Ramnagar Fort, Varanasi